# Rishibhih Kritam Nila Stotram

# ઋષિભિઃ કૃતં નીલસ્તોત્રમ્

## Document Information

Text title : Rishibhih Kritam Nila Stotram

File name : RRiShibhiHkRRitaMnIlastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | nAgarakhaNDa | adhyAya 259/54-68/2||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2025

*sanskritdocuments.org*

# ઋષિભિઃ કૃતં નીલસ્તોત્રમ્

ઋષય ઊચુઃ ।
ત્વં દેવઃ સર્વગોમૃણાં વિશ્વગોપ્તા સનાતનઃ ।
વિઘ્નહર્તા જ્ઞાનદશ્ચ ધર્મરૂપશ્ચ મોક્ષદઃ ॥ ૫૪॥

ત્વમેવ ધનદઃ શ્રીદઃ સર્વવ્યાધિનિષૂદનઃ ।
જગતાં શર્મકરણે પ્રવૃત્તઃ કનકપ્રદઃ ॥ ૫૫॥

તેજસાં ધામ સર્વેષાં સૌરભેય મહાબલ ।
શ‍ૃઙ્ગાગ્રે ધૃતકૈલાસઃ પાર્વતીસહિતસ્ત્વયા ॥ ૫૬॥

વેદસ્તુત્યો વેદમયો વેદાત્મા વેદવિત્તમઃ ।
વેદવેદ્યો વેદયાનો વેદરૂપો ગુણાકરઃ ॥ ૫૭॥

ગુણત્રયેભ્યોઽપિ પરો યાથાત્મ્યં વેદ કસ્તવ ।
વૃષસ્ત્વં ભગવાન્દેવ યસ્તુભ્યં કુરુતે ત્વઘમ્ ॥ ૫૮॥

વૃષલઃ સ તુ વિજ્ઞેયો રૌરવાદિષુ પચ્યતે ।
યદા સ્પૃષ્ટઃ સ તુ નરો નરકાદિષુ યાતનાઃ ॥ ૫૯॥

સેવતે પાપનિચયૈર્નિગાઢપ્રાયબન્ધનૈઃ ।
ક્ષુત્ક્ષામં ચ તૃષાક્રાન્તં મહાભારસમન્વિતમ્ ॥ ૬૦॥

નિર્દયા યે પ્રશોષ્યન્તિ મતિસ્તેષાં ન શાશ્વતી ।
ચતુર્ભિઃ સહિતં મર્ત્યા વિવાહવિધિના તુ યે ॥ ૬૧॥

વિવાહં નીલરૂપસ્ય યે કરિષ્યન્તિ માનવાઃ ।
પિતૄનુદ્દિશ્ય તેષાં વૈ કુલે નૈવાસ્તિ નારકી ॥ ૬૨॥

ત્વં ગતિઃ સર્વલોકાનાં ત્વત્પિતા પરમેશ્વરઃ ।
ત્વયા વિના જગત્સર્વં તત્ક્ષણાદેવ નશ્યતિ ॥ ૬૩॥

પરા ચૈવ તુ પશ્યન્તી મધ્યમા વૈખરી તથા ।

ચતુર્વિધાનાં વચસામીશ્વરં ત્વાં વિદુર્બુધાઃ ॥ ૬૪॥

ચતુઃશૃઙ્ગં ચતુષ્પાદં દ્વિશીર્ષસપ્તહસ્તકમ્ ।
ત્રિધા બદ્ધં ધર્મમયં ત્વામેવ વૃષભં વિદુઃ ॥ ૬૫॥

તૃપ્તિદં સર્વભૂતાનાં વિશ્વવ્યાપકમોજસા ।
બ્રહ્મ ધર્મમયં નિત્યં ત્વામાત્માનં વિદુર્જનાઃ ॥ ૬૬॥

અચ્છેદ્યસ્ત્વમભેદ્યસ્ત્વમપ્રમેયો મહાયશાઃ ।
અશોચ્યસ્ત્વમદાહ્યોઽસિ વિદુઃ પૌરાણિકા જનાઃ ॥ ૬૭॥

ત્વદાધારમિદં સર્વં ત્વદાધારમિદં જગત્ ।
ત્વદાધારાશ્ચ દેવાશ્ચ ત્વદાધારં તથા મૃતમ્ ॥ ૬૮॥

જીવરૂપેણ લોકાંસ્ત્રીન્વ્યાપ્ય તિષ્ઠસિ નિત્યદા ॥

ઇતિ શ્રીસ્કન્દપુરાણે નાગરખણ્ડે એકોનષષ્ટિતમાધિક-
દ્વિશતતમાધ્યાયાન્તર્ગતં ઋષિભિઃ કૃતં નીલસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । નાગરખણ્ડ । અધ્યાય ૨૫૯/૫૪-૬૮/૨॥

skandapurANa . nAgarakhaNDa . adhyAya 259/54-68/2..

Proofread by PSA Easwaran

*Rishibhih Kritam Nila Stotram*

pdf was typeset on August 24, 2025

Please send corrections to *sanskrit@cheerful.com*